National Journal of
Hindi & Sanskrit Research

**ISSN: 2454-9177**
NJHSR 2022; 1(44): 120-122
© 2022 NJHSR
www.sanskritarticle.com

**Soma Mondal**
Ph. D Research scholar,
Department- Advaita vedanta ,
National Sanskrit University,
Tirupati.

**Correspondence:**
**Soma Mondal**
Ph. D Research scholar,
Department- Advaita vedanta ,
National Sanskrit University,
Tirupati.

# वेदान्ते महावाक्यस्वरूपनिरूपणम्

**Soma Mondal**

**DOI:** https://doi.org/10.5281/zenodo.20734592

इन्द्रियाणि सर्वदा विषयाभिमुखी सन् प्राणीनां सुखदुःखमुत्पादयन्ति। मनुष्याः विषयसुखं परमसुखेत्वेन मत्वा विषयेषु पुनः पुनः प्रवर्तन्ते। तथा तेषां आशारूपं कामबीजं विशालाकारं धारयति। तत्तु अग्निसादृशं दुष्पुरणीयं भवति। तदुच्यते -

**न जातु कामः कामानामुपभोगेन शाम्यति।**
**हविषा कृष्णवर्त्मेन भूय एवाभिवर्धते॥**[1] इति।

तथाहि मनसः कारणादेव मनुष्याः बन्धमोक्षभाग् भवन्ति। तदाह-

**मन एव मनुष्याणां कारणं बन्धमोक्षयोः।**
**बन्धाय विषयासक्तं मुक्त्यै निर्विषयं स्मृतम्॥**[2] इति।

जीवब्रह्मणोः भेदप्रतीतेः मूलं भवति अज्ञानम्। सकलानर्थस्य मूलभूतस्य अज्ञानस्य[3] कारणेन जीवः भवबन्धने बध्नाति तथा सांसारिकदुःखभाजः भवति तथा जीवब्रह्माभेदज्ञानेन निवर्त्यते।[4] प्रवृत्तिनिवृत्तिपरसमुद्रसदृशविशालवैदिकवाङ्मयेषु केवलम् उपनिषत्सु एव निवृत्तिरूपं मोक्षमार्गं प्रदर्श्यते। सच्चिदानन्दस्वरूपात्मोपलब्धिरेव परमसुखं वैषयिकसुखं तु मृगतृष्णैव मिथ्या रज्जौ सर्पमिव भ्रमः। विषयाभिमुखं मनसः निग्रहेण शुद्धैकाग्रचित्ते एव तत्त्वमस्यादिमहावाक्यजन्या-खण्डैकरसवृत्तिरूदेति। तज्जन्य जीवब्रह्मैक्यरूपज्ञाने सति आत्मसाक्षात्कारः भवति तथा आत्मयथात्मज्ञानैव संसारनिवृत्त्या मोक्षः सिद्ध्यति[5] इति अद्वैतवेदान्तिनां घण्टाघोषः। अत्मज्ञानेनैव सर्वविधकामनिवृत्तिः भवति[6]। तदा अखण्डाकारवृत्त्या सर्वत्र समदर्शने सति शोकमोहादिरपगच्छति[7]। दर्शनानां दर्शनीयतमे अद्वैतवेदान्तदर्शने चतुर्णां वेदानां शिखारूपं चत्वारि महावाक्यानि प्रसिद्धानि। तानि च - ऋग्वेदस्य **प्रज्ञानं ब्रह्म**[8], यजुर्वेदस्य **अहं ब्रह्मास्मि**[9], सामवेदस्य **तत्त्वमसि**[10], अथर्ववेदस्य **अयमात्मा ब्रह्म**[11] इति।

एतेषु **"प्रज्ञानं ब्रह्म"** इति महावाक्यं स्वस्वरूपपरम्। **"अहं ब्रह्मास्मी"**ति महावाक्यम् अनुभवबोधकम्। **"तत्त्वमसी"**ति उपदेशपरम्। **"अयमात्मा ब्रह्म"** इति अनुसन्धात्मकम् निश्चयात्मकमिति वा। एतेषां महावाक्याणाम् अयं विशेषः तेषाम् एकवाक्यताम् सूचयति। स्वरूपस्य उपदेशे अनुसन्धानेन अनुभूतिः साधनचतुष्टयसम्पन्नस्य मुमुक्षोः सिध्यति।

धर्मार्थकाममोक्षाख्येषु चतुर्विधपुरुषार्थेषु नित्यत्वात् निरतिशयत्वाच्च मोक्षः महापुरुषार्थः। स्वस्वरूपावस्थानमेव मोक्षः। जीवस्य स्वस्वरूपं नाम ब्रह्मभाव एव। स च **"ब्रह्मवेद ब्रह्मैव भवति"**[12] **"ब्रह्मैव सन्ब्रह्माप्येति"**[13] **"आत्मानं विद्वान्ब्रह्मामृतोऽमृतम्"**[14] इत्यादि श्रुतेः ब्रह्मसाक्षात्कारेणैव सिध्यति। ब्रह्मानुभूतिश्च महावाक्यार्थज्ञानमन्तरेण दुःसाध्यः। तस्मात् महाफलमोक्षैकसाधनत्वात् तत्त्वमस्यादिकमेव महावाक्यम्। तदुक्तं वार्तिके-

**तत्त्वमस्यादिवाक्योत्थसम्यग्धीजन्ममात्रतः।**

**अविद्यासहकार्येण नासीदस्ति भविष्यति॥**[15] इति।

अद्वैतसिद्धिव्याख्याने ब्रह्मानन्दीयेऽपि उक्तम् - **अविद्योच्छेदोपलक्षितः पूर्णानन्दरूपः आत्मा मोक्ष**[16] इति।

**महावाक्यशब्दार्थः –** महांश्चासौ वाक्यः महावाक्यः तस्य अर्थः महावाक्यार्थः। महावाक्यश्रवणे अति दीर्घं वाक्यं स्यादिति भाति। यद्यपि महावाक्यशब्दस्य शाब्दिकार्थः बृहत् वाक्यम् अथवा अवान्तरवाक्यानां समष्टिः। यथा साहित्यादिषु ग्रन्थेषु उच्यते-

**वाक्यं स्याद्योग्यताकाङ्क्षासत्तियुक्तः पदोच्चयः।**

**वाक्योच्चयमहावाक्यमित्थं वाक्यं द्विधा मतम्॥**[17] इति।

परन्तु महावाक्यशब्दः वेदान्ते पारिभाषिकः। तत् केवलं पदत्रयघटितं भवति। तत् त्वं असि, अहं ब्रह्मा अस्मि इत्यादि प्रकारेण एतद् अपेक्षया अधिकानि न भवन्ति। वाक्ये प्रयुक्तानि पदानि गणयित्वा संख्या बाहुल्येन महावाक्यमिति नास्ति व्यवहारः वेदान्तशास्त्रे। अद्वैतवेदान्ते महावाक्यत्वमिति विचार इत्युक्ते न वाक्यगतं महत्वं न वा शब्दगतं किन्तु अर्थगतम्। यस्मिन् वाक्ये उपनिषदः प्रकरणस्य वा तात्पर्यं गुफितं परिलक्ष्यते तदेवमहावाक्यमिति व्यावहारः। अत्र महान् इत्युक्ते आपेक्षिकं महत्वं न किन्तु सर्व महान्। सर्वेभ्यः महत्तरेभ्योऽपि महान्। अपरिच्छिन्नमिति शब्देन वक्तुं शक्यते। तथाहि जीवब्रह्मैक्यरूपं महत्तात्पर्ययुक्तं महावाक्यम्। उपनिषदां सर्वासां अद्वितीये ब्रह्मणि तात्पर्यमस्तीति श्रुतिस्मृतिसूत्रैः प्रमाणीकृतम्। एतत् तात्पर्यं तत्त्वमस्यादि चतुर्षु महावाक्येषु प्रतिपाद्यते। वेदान्तवाक्यं द्विविधम् अवान्तवाक्यं महावाक्यं चेति। अवान्तरवाक्यानि महावाक्यज्ञाने सहाय्यं करोति। परिच्छिन्नवस्तु प्रतिपादनात् अवान्तरवाक्यं जीवब्रह्मस्वरूपबिषयकं परोक्षज्ञानं जनयति। वेदान्ते जीवब्रह्मैक्यप्रतिपादकानि वाक्यानि महावाक्यानि उच्यन्ते। एवञ्च यस्मिन् वाक्ये एकप्रकरणसंबद्धानि नैकविधानि वाक्यानि संभूयैकं मुख्यं तात्पर्यं प्रतिपादयति तदेव महावाक्यमिति शास्त्रीयव्यावहारः।

किञ्च देशतः कालतः वस्तुतश्च इति त्रिविधपरिच्छेदशून्यं सच्चिदानन्दस्वरूपं ब्रह्मनिरतिशयव्यापकम्। महतो महत् तादृशस्य अखण्डवस्तुनः साक्षात् प्रतिपादकं तत्त्वमस्यादि वाक्यं महावाक्यमेव। तथा अनायासेन कथं भवबन्धनात् मुक्तिः भवति इति प्रश्ने शङ्करभगवत्पादः तत्त्वमसिवाक्यमिति वाक्यज्ञानमेव मुक्तिसाधनत्वेन निर्दिष्टः[18]।

अद्वैतिनां मते नित्यशुद्धबुद्धमुक्तस्वभावरूजीवब्रह्मैक्यज्ञानं महावाक्यज्ञानादेव भवति। तदुक्तं सर्वज्ञात्ममुनिः- **"विना महावाक्यमतो न कश्चित् पुमांसमद्वैतमवेति जन्तुः"**[19] इति। अतः मृत्युरूपसंसारात् विमुक्तये तत्त्वमसिवाक्यार्थः विचारणीयमेव[20]। यथा मधुकरः सहस्रपुष्पेभ्यः रसं संगृह्य मधुमाविष्कोरति। तथैव श्रोत्रियब्रह्मनिष्टगुरुः सर्वेषु शास्त्रेषु पारङ्गतत्वेन सारं संगृह्य सर्वशास्त्रविषयकं ज्ञानं तत्त्वमस्यादि एकेनैव महावाक्येन शिष्याय प्रददाति। तत् ज्ञानमेव साधनचतुष्टयसम्पन्नस्य आत्मजिज्ञासोः जीवब्रह्मैक्यविषयकापरोक्षज्ञानं जनयति।

**महावाक्यानां संख्या-**

जीवब्रह्माभिन्नरूपं परमप्रेमास्पदसच्चिदानन्दस्वरूपात्मज्ञानरूपमोक्षप्राप्तये अद्वैतज्ञानं नितराम् आपेक्षते। तदर्थं वेदान्ते महावाक्यार्थविचारं परमावश्यकम्। वेदान्तशास्त्रीयग्रन्थेषु महावाक्यानां संख्या भिन्ना भिन्ना दृश्यन्ते। तत्र ऋग्यजुसामर्थशाखाभेदेन प्रसिद्धानां चतुर्णां वेदानां प्रतिनिधिभूतानि **"प्राज्ञानं ब्रह्म "** "अहं ब्रह्मास्मि " "तत्त्वमसि " तथा "अयमात्मा ब्रह्म " इति चत्वारि महावाक्यानि नितरां प्रसिद्धिं भजन्ति। विद्यारण्यस्वामिभिः पञ्चदशी ग्रन्थे प्रादर्शितानि एतानि चत्वारि महावाक्यानि एव महावाक्यशब्देन परिगण्यन्ते विद्वद्भिः। तत्र सदानन्दयोगिन्द्रः स्वीय वेदान्तसाराख्ये प्रकरणग्रन्थे "तत्त्वमसि" "अहं ब्रह्मास्मि" इति द्वे महावाक्ये निरूपिते। श्रीरामचन्द्रयतिना महावाक्यरत्नावली ग्रन्थे शताधिकानि महावाक्यानि संगृहीतानि। महावाक्यार्थविवरणग्रन्थे ११महावाक्यानि उल्लिखितानि- (१) तत्त्वमसि (छा.६/८/७) (२) अहं ब्रह्मास्मि(बृ.उ.१/४/१०) (३)अयमात्मा ब्रह्म (मु.उ.२/बृ.उ.१/५/१९) (4) एष त आत्माऽन्तर्याम्यमृतः (बृ.उ.३/७/३) (५) स यश्चायम् (तै.उ.२/८/५) (६) पुरुषे यश्चासौ (तै.उ.३/१०/४) (७) आदित्ये स एकः (तै.उ.२/८/५) (८) प्रज्ञा प्रतिष्ठा प्रज्ञानं ब्रह्म (ऐत.उ.५/३) (९) सत्यं ज्ञानमनन्तं ब्रह्म (तै.उ.२/१/१) (१०) स एतमेव पुरुषो ब्रह्म (ऐत.उ.३/१३) (११) सर्वं खल्विदं ब्रह्म (छा.उ.३/१४/१) इत्येतानि। देशकालानुसारेण अधिकारि भेदेन च भिन्नरुचीनां जनिमतां ब्रह्मविषये प्रज्ञा सम्पादनाय प्रवृत्तानि श्रुतिस्मृतिपुराणेतिहासादि ग्रन्थेषु नैकविधानि कर्माणि विहितानि। एतेषां सर्वेषां ग्रन्थानां कर्मणां च समन्वयः तत्त्वमस्यादि वाक्ये बीजे वृक्ष इव निहितोऽस्ति। तथा च विद्यारण्यस्वामिभिः पञ्चदश्यां महावाक्यप्रकरणे प्रतिपादितानि तत्त्वमस्यादि चत्वारि महावाक्यभिधानि सार्थकानि। सर्वेषां श्रुतिस्मृत्यादि पौरुषेयापौरुषेयग्रन्थानां महावाक्यगोचरे अद्वितीये ब्रह्मणि समन्वयः मधुसूदनसरस्वत्याचार्येण शिवमहिम्नस्तोत्रव्याख्याने प्रदर्शितः। अयमेव प्रस्थानभेदः इति प्रसिद्धः। तस्मात् वेदान्तमहावाक्यान्येव वस्तुतः महावाक्यानि।

**सहायकग्रन्थसूची**

१. अद्वैतसिद्धिः- मदुसूदनसरस्वती, सम्पादकः- अनन्तकृष्णशास्त्री, निर्णयसागरमुद्रणालय, १९३७

२. ईशादि नौ उपनिषद् (शाङ्करभाष्यार्थ) गीताप्रेस, गोरखपुर

३. उपनिषत्सञ्चयनम्, अनुवाकः- आचार्य केशवलाल वि. शास्त्री, चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली, प्रथमसंस्करण २०१५.

४. छन्दोग्योपनिषद्(सानुवाद शाङ्करभाष्यार्थसहित) - गीताप्रेस, गोरखपुर, ग्यारहवाँ संस्करण- सं.२०६१.

५. ब्रह्मसूत्रशाङ्करभाष्यम् (परिमल - कल्परतु - भामती टीका त्रयोपेतम्), चौखम्बा कृष्णदास अकादमी, वाराणसी, पुनर्मुद्रित, सन् २०१३.

६. बृहदारण्यकोपनिषद् (सानुवाद शाङ्करभाष्यार्थसहित) - गीताप्रेस, गोरखपुर, छठा संस्करण- सं.२०५०.

७. वाक्यवृत्तिः- श्रीमच्छङ्कराचार्यः, श्री दक्षिणामूर्ति मठ, प्रकाशन, काशी, २०००.

८. महावाक्यरत्नावली- प्रकाशकः- गङ्गाविष्णु श्रीकृष्णदास, लक्ष्मीवेंकटेश्वर स्टीम् प्रेस, कल्याण- बम्बई, सन् १९६०.

९. वेदान्तसारः (व्याख्याकारः- डा. लम्बोदर मिश्रः), राष्ट्रीय संस्कृत साहित्य केन्द्र, जयपुर, २००५.

**पाद टिपण्णी :-**

1. नारदपरिव्राजकोपनित्- ३.३७, मनुस्मृतिः-२.९४

2. अमृतबिन्दुपोनिषद्-२

3. अविद्या हि सर्वानर्थबीजमिति श्रुतिस्मृतीतिहासपुराणादिषु प्रसिद्धम्, तदुच्छेदाय वेदान्ताः प्रवृत्ता इति वक्ष्यति। – भामती.अ.भा.पृ.४१

4. अज्ञानादेव संसारः ज्ञानादेव विमुच्यते। - योगतत्वोपनिषद्-१६

5. संसारनिवृत्तिरपवर्ग इह प्रयोजनं विवक्षितम्। संसारश्चात्म्यान-नुभवनिमित्त आत्मयाथात्म्यज्ञानेन निवर्त्तनीयः। – भामती-आध्यासभाष्यम्।

6. आत्मानं चेद्विजानीयादयमस्मीति पुरुषः।
किमिच्छन्कस्यकामाय शरीरमनुसंज्वरेत्॥– बृ.उ.४.४.१२.

7. यस्मिन् सर्वाणि भूतान्यत्मैवाभूद्विजानतः।
तत्र को मोहः कः शोकः एकत्वमनुपश्यतः॥ – ई.उ-७

8. ऐत.उ.५.३

9. बृ.उ.१.४.१०

10. छा.६.८.७

11. मा.उ.-२

12. मु.उ.३.२.९

13. बृ.उ.४.४.६

14. बृ.उ.४.४.१७

15. बृ.उ.वा.(सम्बन्धवार्तिकम्) १.१.१८३.

16. अ.सि.गौडब्रह्मानन्दीयव्याख्या, पृ.५

17. सा.द. परिच्छेद-२

18. तत्त्वमस्यादिवाक्योत्थं यज्जीवपरमात्मनोः।
तादात्म्यविषयं ज्ञानं तदिदं मुक्तिसाधनम्॥ –
वाक्यवृत्तिः, श्लोकः-६

19. संक्षेपशारीरकम् ३.३०३

20. यावन्न तत्त्वम्पदयोरर्थः सम्यग्विचार्यते।
तावदेव नृणां बन्धो मृत्युसंसारलक्षणः॥ –
सर्ववेदान्तसिद्धान्तसारसंग्रहः, श्लोकः- ७०४

21. ऐ.उ.५.३

22. बृ.उ.१.४.१०

23. छा.उ.६.८.७

24. मु.उ.२

25. महावाक्यार्थदर्पण, बर्नेल का कैटेलाग,पृ.९४